# গুরুস্তোত্রম্

{॥ গুরুস্তোত্রম্ ॥}

অথ গুরুস্তোত্রম্ ।

বৃহস্পতিঃ সুরাচার্যো দযাবান্ শুভলক্ষণঃ ।

লোকত্রযগুরুঃ শ্রীমান্সর্বজ্ঞঃ সর্বকোবিদঃ ॥ ১॥

সর্বেশঃ সর্বদাঽভীষ্টঃ সর্বজিৎসর্বপূজিতঃ ।

অক্রোধনো মুনিশ্রেষ্ঠো নীতিকর্তা গুরুঃ পিতা ॥ ২॥

বিশ্বাত্মা বিশ্বকর্তা চ বিশ্বযোনিরযোনিজঃ ।

ভূর্ভুবঃসুবরোং চৈব ভর্তা চৈব মহাবলঃ ॥ ৩॥

পঞ্চবিংশতিনামানি পুণ্যানি নিযতাত্মনা ।

বসতা নন্দভবনে বিষ্ণুনা কীর্তিতানি বৈ ॥ ৪॥

যঃ পঠেত্ প্রাতরুত্থায প্রযতঃ সুসমাহিতঃ ।

বিপরীতোঽপি ভগবান্প্রীতো ভবতি বৈ গুরুঃ ॥ ৫॥

যশ্শৃণোতি গুরুস্তোত্রং চিরং জীবেন্ন সংশযঃ ।

বৃহস্পতিকৃতা পীডা ন কদাচিদ্ভবিষ্যতি ॥ ৬॥

ইতি গুরুস্তোত্রং সম্পূর্ণম্ ।

Encoded and proofread by KSR Ramachandran ramachandran\—ksr at yahoo.ca

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Guru ( Graha ) Stotram Lyrics in Bengali PDF
% File name : gurustotram.itx
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : KSR Ramachandran ramachandran_ksr at yahoo.ca
% Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca
% Description-comments : From Grantha/Tamil book Adityadi Navagraha Stotra
% Latest update : June 28, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website